संस्कृत-दप्तरीत [illegible]

२ तोम

# चि. रघुनाथराव

६९८ / स्लो. ३६५

Rajawade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai. " Joint project of the Rajawade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai."

1

॥ अथ श्रीविष्णुनामस्तवः प्रारभ्यते ॥

" Joint project of the Rajwade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai."

(2)

॥ श्रीगणेशायनमः ॥ श्रीरामकृष्णाजमुकुंदविष्णोनारायणश्रीशहरेमुरारे ॥ इत्येवनित्यंनवनामरत्नावालिःसदाकंठमलंकरोतु ॥ १ ॥
श्रीमन्मुकुंदस्यमुनींद्रसेव्यमुपागतंमूढमुखोपिनाम ॥ विमुक्तिदंपापमुषामुदारंतत्सेरयेन्मन्मतिमात्मबोधे ॥ २ ॥ संसारदावानलतप्य
मानोहाहेतिदुःखंवदतीहकश्चित् ॥ श्रीरामनामामृतसंप्रदानात्कुर्वंतिशांतंतमपीहसंतः ॥ ३ ॥ काचित्खुराहारतयाप्रसिद्धापराखुधाजिह्म
गसंवृतास्ति ॥ अन्यातुबालाधरसंस्थितैवख्रुनिर्मलानामसुधाविभाति ॥ ४ ॥ विधौखुधैवामयरूपभाग्यत्खुधामयःख्यातइहक्षयीसः ॥
तथानरामेत्यभिधासुधेयंयदाश्रितोनक्षययुक्कदापि ॥ ५ ॥ श्रीरामनामामृतपानमत्तोहसत्यथोरोदितिसंभ्रमन्सन् ॥ सर्वस्त्रनाशेपित
देकतानोदेहंनिजंनस्मरतीहकश्चित् ॥ ६ ॥ नामामृतंसर्वजनप्रसेव्यमिहाप्यशेषस्यमलस्यहंतृ ॥ तथापियेकुंभकएवसक्तानायांतिशांतिं
परमांजनास्ते ॥ ७ ॥ यत्कालकूटंकिललोकदाहिविश्वेशकारायशिवेनपीतं ॥ श्रीरामनामामृततःप्रशांतंगलेवभूवास्यतुभूषणंतत् ॥ ८ ॥
नारायणाख्यारससेवनेननरोमरोनिर्जरमान्यरूपः ॥ विराजतेमंगलसंततिश्चकामैनहीनःससदेतिचित्रं ॥ ९ ॥ भवाटवीयंकिलभू
रितापासच्छाखिभंगःकरिणोन्मदेन ॥ कृतोयतोस्यामपिविस्तृतायांहरिध्वनिःकल्पतरुस्त्रभावः ॥ १० ॥ कर्माणितीर्थानितपों
व्रतानिवित्तेनयत्नेनफलप्रदानि ॥ तेषांफलंत्वंतवदेवचाल्पनाम्नालकासोपिभवेद्विमुक्तः ॥ ११ ॥ कृतादिषुत्रिष्वपियेयुगे
षुधर्माःसमासन्ननुकृष्टसाध्याः ॥ नाम्नैवतेषांपरिपूर्तिरासीदस्मिन्कलौतत्सकलेष्टकारि ॥ १२ ॥ पठंतुकर्मागतयैवकेचि
त्खुखंलभंतामपिनिर्विशेषं ॥ वयंतुसंयोगपृथक्त्वनीतेर्नामैवरामस्यसमाश्रयामः ॥ १३ ॥ कलौतुवर्णाश्रमधर्महानिर्भ
वत्यतोनैत्रगतिर्नराणाम् ॥ तथापियेनामरताभवेयुःस्युस्तेखुवर्णाश्रमधर्मवंतः ॥ १४ ॥ विप्राविराजोथविशोत्रिवेदाः
कलात्रशक्ताःस्त्रपदंप्रयातुं ॥ तेसर्ववर्णाहरिवर्णयोगाद्विकारहीनाक्षरतांप्रयांति ॥ १५ ॥ यद्व्यासवल्मीकभवोदितासु

कथांसुलब्धच्छ्रोत्रमनोहरासु ॥ नामस्थितंसप्तविभक्तिरूपंहरत्यशेषाणिनृकल्मषाणि ॥ १६ ॥ विभक्तयःसप्तकिलास्यनाम्नो
बहूनिरूपाणिचतासुतासु ॥ तथापिभक्तिंप्रददातिविष्णोःप्रकाशयत्याशुचिदेकरूपं ॥ १७ ॥ सच्चित्सुखंरामपदंयदाहुः
सरोजवज्रादिसुचिन्हितंच ॥ तदाप्नयेसाधनमत्रकालेसशर्मरामेतिपदस्यरावः ॥ १८ ॥ कलिद्रुमंदाहयितुंसुदुष्टंशक्तोनरोनैवक
दापितादृक् ॥ यादृङ्नृपाणांप्रवरस्यराज्ञोरामस्यनामैवशुचिस्वरूपं ॥ १९ ॥ अपक्षपाताविगताभिमानाविलोभिनोयेभुविसंतिसंतः ॥
सतांसभायांकलिकल्मषघ्नंनामैवविष्णोःप्रवदंतिनान्यत् ॥ २० ॥ ब्रवीमिसत्यंविहितोर्ध्वबाहुर्ममप्रतिज्ञांशृणुतात्रयूयं ॥ कलौयुगेघोर
तरेपिविष्णोर्नामैवमुख्यस्तरणाभ्युपायः ॥ २१ ॥ सतांसमाजेनममाभिमानःपराजयश्चेदपिमेनहानिः ॥ नाम्नोविभिन्नस्तरणाभ्युपायः
कलौयुगेप्यस्तियदिब्रुवंतु ॥ २२ ॥ गायन्नटन्वाप्यनुचिंतयन्सन्कृष्णेतिनित्यंभजतेकलौयः ॥ तमुद्धरत्याशुसएवदेवःख्यातोयतोसौन
रकारिरित्थं ॥ २३ ॥ सुसुंदरंतद्युवतिस्वरूपंसनृत्यगीतंचसुभावयुक्तं ॥ भृशंभवेन्मानसहारितद्वन्नामापिविष्णोरितिमेविभाति
॥ २४ ॥ नापेक्षतेगीतमथोनतालंननर्तनंनाध्ययनंनकर्म ॥ तत्केवलंकेशवनाममनृणांनिषेवितंहंत्यखिलान्यघानि ॥ २५ ॥ संकेततो
वापरिहासतोवायस्तोभनोहेलनतःकदापि ॥ गृणातिविष्णोर्यदिनामकश्चित्तस्याघनाशोपिचपुण्यलाभः ॥ २६ ॥ देहावसानेयदिसंप्रयुक्तं
त्विच्चेचपुत्रादिषुरामनाम ॥ हरत्यघानीहनरस्यसद्योजन्मांतरेज्ञानकरंभवेच ॥ २७ ॥ रामाकृतिंध्यायसिसंततंयत्ततोस्यतीवोज्वलमा
नसस्त्वं ॥ एवंजनेयत्परिहासवाक्यंरामेतिवर्णद्वयतःपुनाति ॥ २८ ॥ अहंमतोमुख्यतमस्त्रिलोक्यांकोवास्तिमत्तोजगदाश्रयोन्यः ॥
नारायणःसत्वजएवकश्चिन्नतिष्ठेत्पुरस्तान्ममकोपिनैव ॥ २९ ॥ एवंवदन्द्वेषयुतोमुरारेरशेषपापौघहरामभिख्यां ॥ योयोसुरेशःसपुरा
विमुक्तोव्यासोजगादात्रवचःप्रमाणं ॥ ३० ॥ संगीतपूर्त्याव्यवहारवाक्यप्रपूरणेनापिचकाकुतोवा ॥ दंभेनवाश्रीरघुनाथनाममुखो

दितंहंत्यखिलान्यघानि ॥ ३१ ॥ धरामरामानदसद्गुणानामारामहेदुष्टसदोविराम ॥ लोकाभिरामातितरामभिज्ञगिरामपाराममतोस्तिकी
र्तिः ॥ ३२ ॥ एवंकृतादुष्कृतिभिर्नृपाणांस्तुतिर्नरामस्यकदाकृतार्थैः ॥ तयापिरामेतिरत्रानुषंगःपुनातिधर्मेचमतिंददाति ॥ ३३ ॥ अश्रद्ध
यानामगृणन्मुरारेःपरंपदंगच्छतिकोपिलोकः ॥ तच्छ्रद्धयासंजपतोजनस्यस्यात्किंफलंतत्तुवयंनविद्मः ॥ ३४ ॥ पापादमुष्माज्जगदेक
शत्रोर्निखिद्यमानंभवमन्मनस्त्वं ॥ श्रीरामनाम्नोऽखिलदेहभाजामुद्धारहेतोरवनारएषः ॥ ३५ ॥ यथाप्रकाशोदिननायकस्यतमःप्रणाशं
भुवनेकरोति ॥ नामप्रभावोरघुनायकस्यपापापनोदंकिलतद्वदत्र ॥ ३६ ॥ अशेषपापापहरांशरण्यांस्त्वनाम्निशक्तिंसुनिरीक्ष्यहर्षात् ॥
अस्मिन्सुविन्यस्तभरोरमेशश्चिरायशेतेजलधौसुखेन ॥ ३७ ॥ उत्पादकंप्रेमरसस्यभूयोबीजंपरंभक्तिसुरत्रतत्याः ॥ मुखेस्थितंमाधव
नामनित्यंदहत्यहोपापवनंसमस्तं ॥ ३८ ॥ हेरामनामाखिलपापवृंदप्रणाशनेयद्यभिमानवत्त्वं ॥ मत्तोपिकःकल्मषवान्जगत्यांदृष्टःश्रुतः
कुत्रकदापिकेन ॥ ३९ ॥ तपोनतप्तंविहितोनयज्ञस्तीर्थंमयानाटितमत्रकिंचित् ॥ धनंनदत्तंनकृतःस्वधर्मोनाभ्नोस्तिकावान्यगतिर्ममेह
॥ ४० ॥ नवेदशास्त्राध्ययनप्रवृत्तोनयोगसांख्याभ्यसनप्रसक्तः ॥ शठोलसश्चातितरांसकामोरामाव्हयंपापलयंभजामि ॥ ४१ ॥
भयानकास्योदृढपाशहस्तःसुभीषणःकोपियमस्यभृत्यः ॥ इत्यद्यदात्वंवदतेमदीयेभोरामनामैहिवसेतियात्रे ॥ ४२ ॥ कृपालुतायाअव
धिस्त्वमेवत्वय्येवसामर्थ्यमिदंविभाति ॥ भवांधकूपेपतितंनरंयस्त्वमंजसोद्धृत्यसुखंकरोषि ॥ ४३ ॥ गलःकदागद्गदितोममस्यान्नेत्रेच
हर्षाश्रुजलेनपूर्णे ॥ वपुःसकंपंपुलकांकितंवाश्रीरामनामोच्चरणेमुखेस्मिन् ॥ ४४ ॥ रामेतिवर्णद्वयमेवपापविमुक्तिदंसत्सकृदुक्तमेतत् ॥
विहायदेहीतिवदद्भिमूढस्तहेहितावारयितुंनशक्या ॥ ४५ ॥ धनंनमेस्तीहकरोमिकिंवाक्कयामिकोदास्यतिमह्यमेवं ॥ समुच्चरत्यच्युतनाम
हित्वाधनस्यहेतोर्निधनंप्रयाति ॥ ४६ ॥ किंजीवितेनापिचकिंधनेनकिंविद्ययावाजनुषासुवंशे ॥ किंपौरुषेणापिचकिंसुखेननचेन्मुखेश्री

रघुनाथनाम ॥ ४७ ॥ दाराःसुताःश्रीःसदनंचदासाइमेमदीयाइतितेषुसक्ताः ॥ तेकालतोयद्यपितद्वियुक्तास्तानुचरंतोनगृणंतिनाम ॥
४८ ॥ दिनेमुहूर्तेचपलेपियेननकीर्तितंवाश्रुतमीशनाम ॥ सएवमूकोबधिरोजडःस्यात्तस्यैवहानिःसुबहून्यघानि ॥ ४९ ॥ खनिंपरंस्त्रे
ष्टपरंपराणांध्वनिंहरेर्नाम्नइमंप्रसिद्धं ॥ त्यजंतियेमोहवशाद्विमूढात्रजंतिनानिष्टपरंपरांकिं ॥ ५० ॥ सावाग्घरेर्नामविभातियस्यांतद्वाङ्मु
खंयत्रनिरंतरंसा ॥ अवाङ्मुखंतद्रहितंकिमुच्चैर्भवेत्सतांधर्मवतांसभायां ॥ ५१ ॥ तस्यैवमातापितरौकृतार्थौसवर्णनीयःसचदर्शनीयः ॥
सवंदनीयःसहिपूजनीयोयस्याननेनामविभातिनित्यं ॥ ५२ ॥ पुत्रःसएवात्रपितुःपवित्रोगोत्रात्मजाधीश्वरगोत्रजापी ॥ तदीयगोत्रंसुकृ
तैकपात्रंगात्रंचतस्याखिलभद्रसत्रं ॥५३॥ रामेतिकृष्णेतिजपंतियत्रसाकापिभूःकाशिकयासमाना ॥ गृहेनयस्मिन्हरिनामघोषःश्मशान
तुल्यंसदनंतदेव ॥ ५४ ॥ नयत्रगेहेहरिनामघोषःसमंसदास्तांपितृकाननेन ॥ उच्चैरवोयत्रभवेत्सएवतद्भूतपावासभुवासमानम् ॥ ५५ ॥
तदेवसाकेतपुरंचसैवकुशस्थलीसामथुराचमाया ॥ अवंतिकाकांच्यभिधापुरीसायत्कीर्तनंयत्रमुकुंदनाम्नः ॥ ५६ ॥ मृत्वैवकाश्यांतुशरीर
भाजोत्रजंतिमुक्तिंकिलदंडपूताः ॥ गृहेवसंतोपिविमुक्तिमंतोभवंतिसंतोरघुनाथनाम्ना ॥ ५७ ॥ येविष्णुनामैवसदाजपंतिप्रसन्नचित्ता
विगतान्यभावाः ॥ नैवास्तितेषांविधिकिंकरत्वंयतःप्रियास्तेविधितातकस्य ॥ ५८ ॥ नबुद्धिभेदंजनयंतिनृणांयथानुरागंकथयंतिलो
कान् ॥ स्वयंसमुत्तीर्णभवाब्धयोपिबुधाहरेर्नाममुदागृणंति ॥ ५९ ॥ यच्चित्तवृत्तीरघुनाम्नासमाधिमग्नाविषयेष्वलग्ना ॥ दयालवःसाधव
आचरंतिकर्माणितेवाजनशर्मवंति ॥ ६० ॥ येवास्ववर्णाश्रमधर्मवंतोजपंतिनित्यंरघुनाथनाम ॥ तेषांक्रियत्स्यात्सुकृतंमुखैःस्वैःशेषोपि
वक्तुंनसमर्थताभाक् ॥ ६१ ॥ वैधानिकर्माणिसमाचरंतियेवानिषिद्धानिपरित्यजंति ॥ मुदाहरेर्नामसदागृणंतितेदुर्लभास्त्रिभुवनेभवंति
॥ ६२ ॥ वर्णाश्रमाचारपथंत्यजेद्यःश्रीरामनामाभिरतोविमुक्तः ॥ अचिंत्यशक्तीरघुनाथनाम्नोयदीदृशस्यापिविमुक्तिकारि ॥ ६३ ॥



Digitized by the Rajawade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai. Joint Project

5A

पुनात्यभिख्यानिजधर्महीनंनधर्महासोविहितोजनस्य ॥ मातातुपुष्णात्यपिसापराधंनैवोचितःस्यात्तनयस्यमंतुः ॥ ६४ ॥ अ
होममभ्रांतिरियंकुतोभून्मातातुनोनामतुलांप्रयाति ॥ लोकांतरेयद्यमधर्मदंडनिवारणेशक्तिमतीनसास्यात् ॥ ६५ ॥ तावत्स्वव
र्णाश्रमधर्मयुक्तोभजेतानित्यंरघुनाथनाम ॥ यावद्भवेत्प्रेमनिमग्नचेताअस्मिन्सदानंदमयस्वरूपे ॥ ६६ ॥ यन्मानसेसर्व
गतंरमेशरूपंविनानैवविभातिकिंचित् ॥ तदाननेयेव्यवहारशब्दास्तेपिप्रभोर्नामतयाभवंति ॥ ६७ ॥ कोवात्रभेदःपरि
कल्पनीयोविश्वंयदंशःपुरुषोत्तमस्य ॥ तत्सर्वथाभेदधियंविमुच्यभजेतनित्यंपरमात्मनाम ॥६८॥ एकस्वरूपस्यहरेर्हरस्यनाम्नोपिभेदं
प्रवदंतियेवा ॥ वनह्निजिव्हाअसुलद्दत्स्वभावाअसमतावामगतिंभिजास्ति ॥ ६९ ॥ नामैवभानुर्ननुराघवस्यतमोविनाशंचजनप्रबोधं ॥
करोतिनित्यंजडपंकशोषंत्द्दंबुजातस्यविकाशमाशु ॥ ७० ॥ दक्षमयावित्स्मृतिपूर्वकंतल्क्षमस्वभोनामविभोतदागः ॥ तापंददात्यस्त
मुपैतिसूर्यस्त्वंशांतिदंसत्सततंविभासि ॥ ७१ ॥ तापापहारीजनमोदकारीसत्तारकाणामधिपस्तथापि ॥ क्षयीकलंकीत्यनुभूतितोनश्री
रामशब्देनशशीसमःस्यात् ॥ ७२ ॥ तमस्यगाधेतरणिस्वरूपोयस्तारकंशोरघुवंशसिद्धौ ॥ तादृक्स्वरूपंप्रवदंतिसंतस्तदीयनामापिसु
निश्चयेन ॥ ७३ ॥ विराजतेयस्यनरस्यकंठेनिरंतरंश्रीहरिनामरत्नं ॥ श्रियःपतिःकौस्तुभभृद्दशात्मातत्तोपिभुवाजगतीहकावा ॥ ७४ ॥
क्रीतोभवेन्नामभिरेवगीतैरधोक्षजोयोगिभिरप्यगम्यः ॥ सुसाधनंभात्यपरंकिमत्रसाध्यंचदेवादपिकेशवाद्वा ॥ ७५ ॥ नाम्न्येवसक्तो
मधुसूदनस्यहर्षाश्रुरोमांचयुतःप्रसन्नः ॥ परंपदंनेच्छतिदीयमानंततोस्तिकावागणनेतरस्य ॥ ७६ ॥ अनंतकल्याणगुणस्यविष्णोस्तवा
स्तिभोनामाक्रियान्विशेषः ॥ एवंविचारेसतिपामराणामपित्वमेवासुलभ्यमानं ॥ ७७ ॥ अगोचरंयन्मनसोपिवाचस्तदक्षरंवस्तुकिला
स्तिकिंचित् ॥ वयंतुवाग्गोचरमक्षरात्मनामैवरामस्यसमाश्रय.मः ॥ ७८ ॥ साकारकंब्रम्हवदंतिकेचित्परेनिराकारमितिब्रुवंति ॥

5

प्रकाशतेयेनहितत्स्वरूपंमुख्यंहरेर्नामवयंवदामः ॥ ७९ ॥ हरिःप्रवृत्तोऽघविनाशनायतदानुतस्यैवमुखेप्रविष्टः ॥ तदीयनाशंव्यननोत्तु
नामपापाननेऽघाप्याखिलाघहंतृ ॥ ८० ॥ जनार्दनोवामनकश्चरुद्रःकपालभृत्किंशरणंभवेद्वा ॥ हितंसुपूतंसुकृतार्थदायिननामचेत्तस्प
जनप्रसिद्धं ॥ ८१ ॥ चकारयज्ञेकुमतिग्रहंयःकपर्दिनोमार्गणकश्चचोरः ॥ महावदान्यंखलुतस्यनामसंकीर्तितंयच्छतिसर्वमिष्टं ॥ ८२ ॥
ददातियन्नामरघूद्वहस्यतद्दातुर्माशोत्रनकोपियस्मात् ॥ कयापिवृत्त्याभजतेनरायस्तत्रवाच्यतांयच्छतियोग्यलभ्यां ॥ ८३ ॥ मत्तोपिमन्ना
मनुतिंकरोतिमयीतिकोपंनहरिःसमेतु ॥ दयालुताचाजनपावनत्वंनाम्नैवलोकेपरमेश्वरस्य ॥ ८४ ॥ सौंदर्यदृप्तावजगोपकांतात्रियोगतप्ता
हरिणाकृतास्ताः ॥ नामान्यगायन्गुणकर्मजानिसंमानिताःश्रीवरदेननेन ॥ ८५ ॥ यदाद्दुरात्माद्रुपदात्मजायादुःशासनश्चैलमपाचकार ॥
तदैवनामैकपरायणायात्रासांसिभूयांस्युदितानितस्याः ॥८६॥ ध्रुवःसबालोहरिनामसक्तोऽवृणोत्पितूराज्यपदंरमेशात्॥अकांक्षितंविष्णुपदं
ययौतत्तन्नामधेयस्यवरःप्रभावः ॥ ८७॥ मृतोनशस्त्रैर्नविषेणनागदंशैनहस्तींद्रपदैर्बुधिभ्यां ॥ नवन्हिनानोगिरिपाततश्चकायाधवोसौहरि
नामवर्मा ॥ ८८ ॥ अजामिलःपापतमोंतकालेनारायणेत्येवववदस्वपुत्रं ॥ परंपदंप्रापततोस्तिलोकेनामैवविष्णोःपरमंदयालु ॥ ८९ ॥
ददर्शविश्वात्मकमीशरूपंधनंजयोदिव्यविलोचनोपि ॥ कोसीतिपृच्छन्यदुनंदनंतंविमूढचेताअभिधानमेव ॥ ९० ॥ कालोस्मिलोकक्षय
कृत्प्रवृद्धोजगादनामेतितदामुकुंदः ॥ नामांतरानास्तिहिबोधसिद्धिर्नामैवतस्मात्सुधियात्रसेव्यम् ॥ ९१ ॥ यस्मात्क्षरातीततयाप्रसिद्धोऽ
क्षरादमुष्मादपिचोत्तमोस्मि ॥ अतोत्रवेदेपुरुषोत्तमोऽहमितिस्वनामैवजगादपार्थं ॥ ९२ ॥ मायामधुभ्रांतमतिर्मनुष्योनस्वंविजानाति
परात्मरूपं ॥ मनीषिभिस्तन्मधुसूदनस्यनामैवविज्ञानकरंसमुक्तं ॥९३॥ परंनिदानंकृतकृत्यतायानामैवतस्मात्परमात्मनोस्ति ॥ तितीर्षु
णानद्भवसागरेस्मिन्नपास्यकिंस्यात्समुपास्यमन्यत् ॥ ९४ ॥ कात्रास्तिनीनिस्तवरामनामकस्याग्रतोवाच्यमिदंमयेह ॥ त्वामाश्रिताये



Rajwade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai

5A

भवबंधमुक्त्यैत्वयैवबद्धाःस्वगुणैःकृतास्ते ॥ ९५ ॥ गदायदीयेनिवसंतिकायेचित्तेऽरयःषट्चमनोभवाद्याः ॥ अंतेमुखेयस्यरमेशनाम
सजायतेनित्यगदारियुक्तः ॥ ९६ ॥ शब्दात्मकंसद्भजतेनरायपुण्यस्यसंस्पर्शनमातनोति ॥ रूपंहरेर्दर्शयतिस्वमेवामृतंपरामोदकरंच
नाम ॥ ९७ ॥ यद्गोचरंसत्परमात्मनामस्वसक्तवृत्तिमनुजंजगत्याम् ॥ करोत्यहोनिर्विषयस्वरूपंसत्चित्सुखंनामतदस्तुवाचि ॥ ९८ ॥
विचित्ररूपोहरिनामवन्हिर्लग्नोयदीयेवदनोपितस्य ॥ करोतिसंतापदर्तिप्रमोदंतत्संगिसंसारवनस्यभस्म ॥ ९९ ॥ संसारदावानलतप्य
माननरस्यसंजीवनमप्यपापम् ॥ यत्पंकजातंनितरांहिहंतितथापिहंसालिमुदंतनोति ॥ १०० ॥ अशेषपापागविनाशनेनपवैःकठोरं
रघुनाथनाम ॥ तथापिनित्यंनवनीततोपिसुकोमलंदीनजनावनेन ॥ १०१ ॥ यःकृष्णनाम्नीहभवेत्सुरक्तःसउज्वलात्माविषयेविरक्तः ॥
स्यात्पीतवासाघननीलकांतिरनेकवर्णीहितदीशनाम ॥२॥ सुकृतसृष्टिविधौविधयत्यदःकलुषनाशकृतौहरतिस्वयम् ॥ अवनकृज्जतांहर
यत्यहोत्रिगुणमप्यगुणात्मनिदर्शकम् ॥ ३ ॥ मुनिभिःपुराणनिचयेभवार्तिल्लृद्रघुनाथनामकथितंसुविस्तरात् ॥ मयितद्विधानमतिनादया
लुनागुरुणाप्रकाशितमिदंभजेधुना ॥ ४ ॥ जयतिश्रीगुरोरेकाकरुणामामपिपामरे ॥ कुटुंबभरणासक्तोभक्तोनास्यास्मिमूढधीः ॥ ५ ॥ उपा
देयंहरेर्नामपदंवाश्रीगुरोःपदे ॥ ततोन्यानीहहेयानिपदानिविपदांकिल ॥ ६ ॥ शुद्धाद्वैतानंदश्रीजीवनतोषणंभवतुनित्यं ॥ इतिकृत
नामनुतिरहंवंदेतद्देशिकेंद्रपदयुगलं ॥ ७ ॥ विष्णुनामस्तवंचक्रेश्रीक्षेत्रेनासिकेवसन् ॥ धर्माधिकारितावृत्तिर्देवोगंगाधराभिधः ॥ ८ ॥
इतिदेवोपाह्वकविगंगाधरविरचितश्रीविष्णुनामस्तवःसंपूर्णतामगमत् ॥ श्रीशंवंदे ॥ शुभंभवतु ॥ ॥ ७ ॥ ॥ ७ ॥

(6)

॥ इति श्रीविष्णुनामस्तवः समाप्तः ॥

" Joint project of the Rajwade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai."

## मूळ प्रत पाहण्यासाठी संपर्क

---

**इतिहासाचार्य वि.का. राजवाडे संशोधन मंडळ, धुळे**
राजवाडे पथ, गल्ली नं. १, धुळे-४२४००१ (महाराष्ट्र)
**दूरध्वनी क्रमांक** (०२५६२) २३३८४८
**Email ID** : rajwademandaldhule@gmail.com